**अनुत्पन्नसंस्काररूप** (anutpannasaṁskāra-rūpa) *n.* form on which affectation has not taken place असंस्कृतरूपम् — अनुत्पन्नसंस्काररूपम् Bhāsk. i. 100.14 (*on* i. 2.6)

**अनुत्पन्नसम** (anutpanna-sama) *adj.* as good as that which has not emerged (रजतम्) अनुत्पन्नसममेव स्यात् PañcPā. 9 8 (*on* i. 1.0); जातोऽपि निश्चयो द्रागेव विलीनोऽनुत्पन्नसमो भवति NyāyRa. 93. 18 (*on* 2.160)

**अनुत्पन्नसमय** (anutpanna-samaya) *adj.* about which the convention has not come into being अनुत्पन्नसमयानामस्मर्यमाणपदार्थानां शब्दस्मरणेऽपि तदभावात् NyāyVārPari. 446.14.

**अनुत्पन्नसंभोगा** (anutpanna-sambhogā) *f.* a kind of *virahotkaṇṭhitā nāyikā* in whose case union has not taken place वयं शृङ्गाररसानुकूलं कार्यविलम्बितसुरता अनुत्पन्नसंभोगेति भेदद्वयं वदामः ŚṛṅgāMañ (A.) 20. 1.

**अनुत्पन्नसस्पृहा** (anutpanna-saspṛhā) *adj.* in whom reciprocal love has not arisen आलापयत्यकार्याणि किंचिदाख्याति वा स्वयम् । या न प्रयाति शयनं साप्यनुत्पन्नसस्पृहा VīṭVṛ. 28.

**अनुत्पन्नसौहृद** (anutpanna-sauhṛda) *adj.* in whom friendship has not arisen उपचारः कर्तव्यो यावदनुत्पन्नसौहृदो भवति SūktiRa. 88. 27; उपचारः कर्तव्यो यावदनुत्पन्नसौहृदाः पुरुषाः BhojPra. 15.29.

**अनुत्पन्नागम** (anutpannāgama) *m.* the unborn or originless Veda पन्थाः …। अनुत्पन्नागमोत्थत्वात्पुराणश्चेति शब्द्यते BṛĀraUBhVā. iv. 4.547.

**अनुत्पन्नातिशय** (anutpannātiśaya) *adj.* in which special change has not appeared यो नाम नाशहेतुः स भावे न किंचित् करोतीत्यकिंचित्करो नापेक्षणीयः । तत्कथमिदानीमनुत्पन्नातिशयस्तदवस्थ एव भावो नष्टो नाम PramāVāSvopVṛ. 99. 23.

**अनुत्पन्नाद्वयविशुद्धविद्य** (anutpannādvayaviśuddhavidya) *adj.* in whom the knowledge or realisation of the secondless and pure (Brahman) has not arisen अविकृतस्य नियतदेशस्य ब्रह्मणः प्राप्तये युज्यते मार्गविशेषः ।… न तावदनुत्पन्नाद्वयविशुद्धविद्यस्यायं मार्गः, ब्रह्मविदः श्रवणात् BrahmSi. 124.8.

**अनुत्पन्नाधिष्ठानतत्त्वसाक्षात्कार** (anutpannādhiṣṭhānatattvasākṣātkāra) *adj.* in whom the realisation of the true nature of substratum has not arisen (so far) रूप्यबुद्ध्यन्तरोत्पत्तिस्तु … अनुत्पन्नाधिष्ठानतत्त्वसाक्षात्कारस्य भवत्येव (जनस्य) AdvaiSi. 650.17.

**अनुत्पन्नानिरुद्ध** (anutpannāniruddha) *adj.* [*f.* -ā] non-arisen and non-ceased निवृत्तमभिधातव्यं निवृत्ते चित्तगोचरे । अनुत्पन्नानिरुद्धा हि निर्वाणमिव धर्मता MūlaMaKā. 18. 7; रूपं न नित्यं नानित्यमतीतान्तं विशुद्धकम् । अनुत्पन्नानिरुद्धादि व्योमाभं लेपवर्जितम् AbhisaAlaṅ. 3. 12; अनुत्पन्नानिरुद्धान् सर्वधर्मानवभोत्स्य इत्येवं चित्तमुत्पाद्य नान्तरा दृष्टिगतेषु प्रपततीदं देवपुत्र चतुर्थमानन्तर्यम् ŚikṣāSa. 18.4.

**अनुत्पन्नानिरुद्धस्वभाव** (anutpannāniruddha-svabhāva) *adj.* of the nature of what is non-arisen and non-ceased अविकृत एव अनुत्पन्नानिरुद्धस्वभाव एवात्मा BodhiCaPañ. 220. 4.

**अनुत्पन्नापत्य** (anutpannāpatya) *adj.* [*f.* -ā] to whom a child is not born, childless विचित्रवीर्यस्त्वनपत्य (v.l. अनुत्पन्नापत्यः) एव विदेहत्वं प्राप्तः MahāBhā. i. 90.55; अनुत्पन्नापत्या गृहीतगर्भा मृतभर्तृकास्तासामपि दायो देयः आ पुत्रलाभात् Aparā. 728. 3 (*on* 2.120)

**अनुत्पन्नापत्यवती** (an-utpannāpatyavatī) *adj.* (*f.*) childless, who has not given birth to a child ब्रह्मचारिणी अनुत्पन्नापत्यवत्यपि त्यक्तमैथुना ManvaVi. 691. 5 (*on* 5.158)

**अनुत्पन्नापेक्षाबुद्धि** (anutpannāpekṣābuddhi) *f.* enumerative or relative notion that is not arisen यस्त्वयमैन्द्रियकः प्रत्ययः प्रत्येकमगृहीतैकत्वेषु वृक्षेष्वनुत्पन्नापेक्षाबुद्धेर्द्रागित्येकघनवनावगाही जायते TātpaṬ.(Vā.) 395.25 (*on* ii. 1. 36)

**अनुत्पन्नाभिव्यक्तिकत्व** (anutpannābhivyaktika-tva) *n.* the state of being that whose manifestation has not come into being पदेष्वतीतत्वादि चोच्चारणक्रियानाशादिना नष्टत्वम्, अनुत्पन्नत्वं च — नष्टाभिव्यक्तिकत्वमनुत्पन्नाभिव्यक्तिकत्वं वा VaiyāSiMañ. 150. 6.

**अनुत्पन्नार्यधर्मा** (anutpannāryadharmā) *adj.* (*f.*) in which noble qualities have not arisen अनुत्पन्ना आर्यधर्मा अस्यामित्यनुत्पन्नार्यधर्मा संततिः पृथग्जनत्वम् Sphuṭā. ii. 75.7 (*on* 2.40)

**अनुत्पन्नार्यमार्गा** (anutpannāryamārgā) *adj.* (*f.*) in which (attribute required for) the noble path has not arisen अनुत्पन्ना आर्यधर्मा अस्यामित्यनुत्पन्नार्यधर्मा संततिः पृथग्जनत्वम् । अनुत्पन्नार्यमार्गा स्कन्धसंततिरित्यर्थः Sphuṭā. ii. 75. 7 (*on* 2. 40)

**अनुत्पन्नावयवक्रियत्व** (anutpannāvayavakriya-tva) *n.* the state of being that in which the activity of the parts is not arisen नापि विधुरप्रत्ययादिना कार्यानुत्पत्तिरनुत्पन्नावयवक्रियत्वविशेषणोपादानेन तद्विनाशानाशङ्कनात्क्रियातश्चोत्तरोत्तरकार्याणामवश्यंभावित्वात् NyāyMañ. i. 118. 5.

**अनुत्पन्नावस्थ** (anutpannāvastha) *adj.* which is in the state of non-origination आहवनीयादीनां तु … अनुत्पन्नावस्थानाम् … उपपन्नमुत्पाद्यत्वम् TantrVā. 1147.8 (*on* iii. 7. 33)

**अनुत्पन्नाविध्वस्त** (anutpannāvidhvasta) *adj.* neither originated nor perished अनुत्पन्नाविध्वस्तो द्रव्यसमयः TattvPradī.(A.) 196.3 (*on* 2.47)

**अनुत्पन्नोत्पादन** (anutpannotpādana) *n.* bringing about of something which is not (yet) existent सत्यपि च करोतेरनेकार्थत्वे सर्वत्र … किंचिदनुत्पन्नोत्पादनसामान्यमवगम्यते TantrVā. 343. 17 (*on* ii. 1.1)

**अनुत्पलच्युति** (anutpala-cyuti) *f.* abandonment of the non-lotus न ह्यनीलत्वव्युदासेऽनुत्पलच्युतिः ŚlokaVār. 5(13).116 (596.6); TattvSaṁ. 968.

**अनुत्पलव्युदास** (anutpala-vyudāsa) *m.* exclusion of the non-lotus अनीलत्वव्युदासेऽनुत्पलव्युदासो नास्ति TattvSaṁPañ. 308. 14 (*on* 968)

**अनुत्पलापोह** (anutpalāpoha) *m.* exclusion of what is other than a lotus अनीलापोहेऽनुत्पलापोहोऽनुत्पलापोहे चानीलापोहो नास्ति Śarka. 59. 8; न ह्यनीलापोहानुत्पलापोहयोरितरेतरत्र समवायः, यतो विशेषणविशेष्यत्वं स्यात् NyāyRa. 596. 24 (*on* 5(13).116)

**अनुत्पाट्य** (an-utpāṭya) *ger.* not having uprooted रागमहीरुहः । भूमिभूतमनुत्पाट्य द्वेषमुन्मूल्यते कथम् RājTa.(Ka.) 3.519.

**अनुत्पात** (an-utpāta) *adj.* free from blemishes रत्नं उत्तमं वस्तु अनुपद्रवं अनुत्पातं न वर्तते comm. *on* YaśasCam. i. 424.27.

**अनुत्पातग्रहवेधाद्युपप्लव** (an-utpātagrahavedhādyupaplava) *adj.* free from calamities such as a portent and disturbance due to an eclipse etc. द्विजाग्र्यम् … गुरुर्गुरुपदं नयेत् … ताराभर्तर्यनुत्पातग्रहवेधाद्युपप्लवे MṛgendraT. ii. 8.188 (*but* comm. अविद्यमानो वैवर्ण्यचापल्याकृतिवैरूप्यादिः उत्पातो यस्य तस्मिन्)

**अनुत्पाद** (an-utpāda) *m.* **A1** non-birth, non-origination, non-coming into being अनुत्पादक्षान्ति धर्मालोकमुखं निरोधसाक्षात्क्रियायै संवर्तते LaliVi. 4. 0(60); LaṅkāSū. 3. 109 (82.27); अनुत्पादक्षमाज्ञानं धर्माणामेकधारणा । कल्पनायाः समुद्घातः संज्ञादृक्क्लेशवर्जनम् AbhisaAlaṅ. 1. 63; उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवेषां धर्माणां(?णां) धर्मता ĀryaŚāS. 4. 4; दृशिरूपस्य स्वामिनो दर्शितविषयस्य प्रधानचित्तस्यानुत्पादः YogBh. 93. 4 (*on* 2. 23); (दुःखस्य हानिः) अनुत्पन्नयोर्धर्माधर्मयोरनुत्पादेन NyāyVār. 2. 17 (*on* i. 1.1); द्रव्यमात्रार्थिनो द्रव्यस्य स्थितेर्विनाशाभावादपूर्वस्यानुत्पादान्मध्यस्थता BrahmSi. 69. 2; तस्मिन् सति हि कार्याणामुत्पादस्तदभावतः । अनुत्पादात्स एवैवं हेतुत्वेन व्यवस्थितः TattvSaṁ. 400; सर्वतो युगपद्वृत्तेरनुत्पादादसर्वगम् MṛgendraT. i. 12. 33; अनुत्पादाच्च पूर्वत्वात्स्वयंभूरिति स स्मृतः KūrmaP. 48. 9 (1. 4); सुखादेरुत्पादानुत्पादयोरविशेषात् सर्वदा सुखित्वं न कदाचिद्वा स्यात् NyāyMañ. i. 71.9; नैमित्तिकत्वे तु … अनुत्पाद एव संसारस्य स्यात् TattvVai. 80.21 (*on* 2. 17); अपूर्वयोर्धर्माधर्मयोरनुत्पादेनोत्पन्नयोश्चोपभोगात्प्रक्षयेणेति TātpaṬ.(Vā.) 14.13 (*on* i.1.1); 242.17 (*on* i. 1.22); किमिदमात्यन्तिकत्वं पूर्वोत्पन्नानां शरीरेन्द्रियविषयाणां विनाशः, अनुत्पन्नानां चात्यन्तिकोऽनुत्पादः ŚāstrDī. 125.31 (*on* i. 1. 5); दुःखनिवृत्तेरात्यन्तिकत्वं नाम सजातीयस्य तत्रैवात्मनि पुनरनुत्पादः TārkiRa. 129. 9; अनुत्पादः श्रेयान् किमु कथय पथ्योऽथ विलयो विनाशो लब्धस्य व्यथयतितरां न त्वनुदयः PraboCan. 4. 22 (77. 4) (comm. अलाभः); न केवलमुत्पन्नपापस्य नाशोऽनुत्पन्नस्याप्यनुत्पादः ManvaVi. 1459.2 (*on* 11.230); वसन्ते चूतपुष्पादेरनुत्पादो न दुष्यति BhāvPra.(Śā.) 278.3(9); स चाभावः सतो विघ्नस्य ध्वंसोऽनागतस्यानुत्पादः TattvCin. i. 73. 2; पूर्वशरीरेण सहात्मनो यः संयोगाभावः स एव मोक्षः तदभाव इति अनागतशरीरानुत्पादे संयोगाभावः Upask. 249.10 (*on* v. 2.18); 280. 1 (*on* vi. 2.16); अनुत्पादे प्रधानकर्मगोवृत्तित्वान्वयः VyutpaVā. 126.7; **A11** non-origination as yet (implying future origination) अनुत्पादस्यापि प्रागभावतयानुत्पाद्यत्वात् TattvPradī.(Ci.) 358.6; SarvaDaKau. 135. 11; **B** non-arising स्कन्धानाम् … अनुत्पादाय प्रशान्तये गुरोरन्तिके ब्रह्मचर्यं चरिष्यामि YogBh. 204.14 (*on* 4. 21); येऽपि … 'द्वैतविषयं कर्म, अद्वैतविषयं ज्ञानम्' इति मन्यन्ते, तेषामनुत्पाद एवाद्वैतज्ञानस्य प्रसज्यते BrahmSi. 32.9; यत्तु प्राप्तस्य ज्ञानस्यानुत्पादोच्छेदसंस्कारविच्छेदानामशक्यत्वान्नास्ति बाधनम् TantrVā. 882.1 (*on* iii. 3. 14); पुरुषेच्छाप्रतिबद्धयोरनुत्पादेऽपि वस्तुपरिच्छेदमात्रेणापेक्षाबुद्धेः पर्यवसानात् NyāyKa. 5. 20; 22.6; संशयस्य … तदभिधानमनर्थकम् … विशेषस्मृत्यनपेक्षस्य संशयस्यानुत्पादात् TātpaṬ.(Vā.) 4.5 (*on* i. 1.1); 166. 18 (*on* i. 1. 5); क्वचिदपि संबन्धाभावे भ्रान्तेरनुत्पादात्